२१

द्वितीयाकारकविभक्तिः-२

प्रस्तावना

संस्कृतभाषायाम् तावत् षट् कारकाणि सन्ति। कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणम् चेति। एतेषु कर्म किं भवति इति प्रतिपादयितुं भगवान् पाणिनिः कर्मसंज्ञाविधायाकानि कानिचित् सूत्राणि रचितवान्। तत्र केषाञ्चित् कर्मसंज्ञाविधायकानां सूत्राणां व्याख्यानं द्वितीये पाठे कृतम्। अत्र च अकथितं च, गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति एतयोः द्वयोः सूत्रयोः व्याख्या क्रियते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- अकथितं च इति सूत्राशयं ज्ञातुं शक्नुयात्।
- द्विकर्मधातवः के सन्ति इति ज्ञातुं प्रभवेत्।
- द्विकर्मकधातुघटितवाक्यानां सम्यग् व्यवहारं कर्तुम् पारयेद्।
- द्विकर्मकधातुषु गौणकर्म किम् प्रधानं कर्म किमिति निर्णेतुम् शक्नुयात्।
- यदा द्विकर्मकधातोः कर्मणि प्रत्ययः विधीयते तदा कतरत् कर्म उक्तं भवतीति ज्ञास्यति।
- ण्यन्तधातुघटितवाक्येषु कस्य कर्मसंज्ञा भवति इति ज्ञातुं प्रभवेत्।
- गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रस्यार्थं ज्ञातुं प्रभवेत्।

[२१.१] अकथितं च॥ (१.४.५१)

सूत्रार्थः - अपादानत्वादिविशेषरूपेण अविवक्षितं दुह्यादिषोडशधातुवाच्यक्रियायाः मुख्यकर्मणा सह सम्बद्धं यत् तत्कारकसंज्ञं सत् कर्मसंज्ञं भवति।

सूत्रावतरणम् - संस्कृतभाषायाम् तावत् षट् कारकाणि सन्ति। कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणम् चेति। एतेषु किमपि कारकं तत्कारकत्वेन अविवक्षितं चेत् कथं कर्म भवति इति प्रतिपादयितुम् अकथितं च इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञां कर्मसंज्ञां च करोति। सूत्रेऽस्मिन् द्वे पदे स्तः। अकथितम् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम्। कारकम् इति अधिकृतम्। अकथितमित्यस्य अविवक्षितमित्यर्थः।

सूत्रार्थविचारः - अकथितं कारकं सत् कर्मसंज्ञं भवति इति वाक्ययोजना। अत्र अकथितमित्यस्य अविवक्षितमित्यर्थः। ततश्च जिज्ञासा भवति केन रूपेण अविवक्षितमिति। एवञ्च प्रकरणवशात् अत्र अपादानादिविशेषरूपेण अविवक्षितमिति स्वीक्रियते। पुनः अनेन सूत्रेण न यस्य कस्यापि कर्मसंज्ञा क्रियते, अपि तु यत् अविवक्षितं भवेत्, अपि च दुह् प्रपूरणे, टुयाचृ याच्ञायाम्, डुपचष् पाके, दण्ड दण्डनिपातने, रुधिर् आवरणे, प्रच्छ् ज्ञीप्सायाम्, चिञ् चयने, ब्रूञ् व्यक्तायां वाचि, शासु अनुशिष्टौ, जि अभिभवे, मन्थ विलोडने, मुष स्तेये, णीञ् प्रापणे, हृञ् हरणे, कृष विलेखने, वह प्रापणे इत्येतद्धातुवाच्यक्रियायाः मुख्यकर्मणा सह सम्बद्धमपि भवेत् तस्यैव अनेन सूत्रेण कर्मसंज्ञा क्रियते। एवञ्च सूत्रार्थः प्रतिफलति - अपादानत्वादिविशेषरूपेण अविवक्षितं सत् यद् दुहादिषोडशधातुवाच्यक्रियायाः मुख्यकर्मणा सह सम्बद्धं भवति तदपि कारकसंज्ञं सत् कर्मसंज्ञं भवति इति।

अत्रायं विशेषः - कर्तुरीप्सिततमं कर्म इति सूत्रेण यस्य कर्मसंज्ञा भवति तदेव मुख्यं कर्म इत्युच्यते। अकथितं चेति सूत्रेण यस्य कर्मसंज्ञा भवति तद् गौणं कर्म इत्युच्यते। पुनः इदमपि अत्र बोध्यम् - अविवक्षा द्विविधा भवति प्राप्तिपूर्विका अप्राप्तिपूर्विका चेति।

उदाहरणम् - गोपः गां पयः दोग्धि। वामनः बलिं वसुधां याचते। विनीतः अविनीतं विनयं याचते। पाचकः तण्डुलान् ओदनं पचति। राजा गर्गान् शतं दण्डयति। गोपः व्रजं गाम् अवरुणद्धि। पथिकः माणवकं पन्थानं पृच्छति। बालकः वृक्षं फलानि अवचिनोति। गुरुः शिष्यं धर्मं ब्रूते। गुरुः शिष्यं धर्मं शास्ति। देवदत्तः यज्ञदत्तं शतं जयति। देवः क्षीरनिधिं सुधां मथ्नाति। चौरः देवदत्तं शतं मुष्णाति। गोपः ग्रामम् अजां नयति। गोपः ग्रामम् अजां हरति। गोपः ग्रामम् अजां कृषति। गोपः ग्रामम् अजां वहति।

सूत्रार्थसमन्वयः -

गोपः गां पयः दोग्धि। अत्र वाक्ये दुहिधातोः प्रयोगः अस्ति। गोपः कर्ता अस्ति। पयः मुख्यकर्म अस्ति। गौः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि अत्र वाक्ये दुहिधातोः विभागानुकूलव्यापारः अर्थः। एवञ्च विभागानुकूलव्यापारः गोपे अस्ति अतः व्यापाराश्रयत्वात् सः कर्ता। विभागरूपं फलं पयसि वर्तते। अतः फलाश्रयत्वात् तस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। पुनः दोहनेन पयसः गोः विभागः अभवत्। विभागाश्रयत्वात् गोः अपादानसंज्ञा भवति। अत्रैव यदा अपादानभूतस्य गोः अपादानत्वेन रूपेण अविवक्षा क्रियते तदा गौः अपादानत्वादिरूपेण अविवक्षिता भवति। अपि च दुहिधातुवाच्यक्रियायाः मुख्यकर्मणा पयसा सह गौः सम्बद्धा अपि अस्ति। अतः तस्या गोः अकथितं च इति सूत्रेण कर्मसंज्ञा भवति। कर्मत्वाच्च तत्र द्वितीया भवति। तेन गोपः गां पयः दोग्धि इति वाक्यं सिध्यति। यदा च अपादानत्वादिरूपेण अविवक्षा नैव क्रियते तदा अपादानसंज्ञा एव भवति। ततश्च अपादाने पञ्चमी भवति। तेन च गोपः गोः पयः दोग्धि इति वाक्यमपि सिध्यति।

वामनः बलिं वसुधां याचते। अत्र वाक्ये याचिधातोः प्रयोगः अस्ति। वामनः कर्ता अस्ति। वसुधा मुख्यकर्म अस्ति। बलिः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र याचिधातोः याचनानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः वामनः। अतः सः कर्ता। याचनारूपफलाश्रयत्वात् वसुधायाः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। बलेस्तु कारकत्वेऽपि न कापि विशिष्टा अपादानादिसंज्ञा प्राप्ता। अतस्तत्र नटस्य शृणोति इतिवत् षष्ठी प्राप्ता। एवञ्च बलेः अपादानत्वादिविशेषरूपेण सर्वथा अप्राप्तिपूर्विका अविवक्षा वर्तते। एवञ्च बलिः याचिधातुवाच्यक्रियायाः मुख्यकर्मणा वसुधया सह सम्बद्धः अपि अस्ति। अतः अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च वामनः बलिं वसुधां याचते इति प्रयोगः सिध्यति।

माता तण्डुलान् ओदनं पचति। अत्र वाक्ये पचिधातोः प्रयोगः अस्ति। माता कर्त्री अस्ति। ओदनः मुख्यकर्म अस्ति। तण्डुलः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र पचिधातोः पाकानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः माता। अतः सा कर्त्री। पाकरूपफलाश्रयत्वात् ओदनस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। तण्डुलश्च ओदनपाके प्रकृष्टोपकारकः भवति। अतः साधकतमं करणम् इति सूत्रेण तस्य करणसंज्ञा प्राप्ता भवति। तस्यैव यदा करणत्वादिविशेषरूपेण अविवक्षा क्रियते तदा सः करणत्वादिविशेषरूपेण अविवक्षितः भवति। एवञ्च पचिधातुवाच्यक्रियायाः मुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतः अकथितं चेति सूत्रेण तण्डुलस्य कर्मसंज्ञा भवति। तेन ततः अपि द्वितीया भवति। ततश्च माता तण्डुलान् ओदनं पचति इति वाक्यं सिध्यति।

राजा गर्गान् शतं दण्डयति। अत्र वाक्ये दण्डधातोः प्रयोगः अस्ति। राजा कर्ता अस्ति। शतं मुख्यकर्म अस्ति। गर्गाः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र दण्डधातोः ग्रहणानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः राजा। अतः सः कर्ता। ग्रहणरूपफलाश्रयत्वात् शतस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। यदा राजा गर्गेभ्यः शतस्य आदानं करोति तदा गर्गेभ्यः शतस्य विभागः भवति। अतः विभागाश्रयत्वात् गर्गाणाम् अपादानासंज्ञा प्राप्ता। किन्तु यदा अपादानत्वेन अविवक्षा क्रियते तदा तत् अपादानत्वेन रूपेण अविवक्षितं भवति। अपि च ते गर्गाः शतरूपमुख्यकर्मणा सह सम्बद्धा अपि सन्ति। अतः गर्गाणाम् अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च **राजा गर्गान् शतं दण्डयति** इति प्रयोगः सिध्यति।

गोपः व्रजं गाम् अवरुणद्धि। अत्र वाक्ये रुधिधातोः प्रयोगः अस्ति। गोपः कर्ता अस्ति। गौः मुख्यकर्म अस्ति। व्रजः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र रुध् -धातोः निर्गम -प्रतिबन्धकः चिरस्थित्यनुकूलः बन्धनादिरूपः व्यापारः अर्थः। एतादृशव्यापाराश्रयः गोपः। अतः सः कर्ता। गमन -प्रतिबन्धकः चिरस्थित्यनुकूलः बन्धनादिरूपः यो व्यापारः तज्जन्यगमनप्रतिबन्धक -चिरस्थितिरूपफलाश्रयत्वात् गोः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। व्रजस्य तु कर्मद्वारा फलाश्रयत्वात् अधिकरणसंज्ञा प्राप्ता। किन्तु यदा अधिकरणत्वेन अविवक्षा क्रियते तदा सः अधिकरणत्वेन रूपेण अविवक्षितः भवति। अपि च स गोरूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य व्रजस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च **गोपः व्रजं गाम् अवरुणद्धि** इति प्रयोगः सिध्यति।

पथिकः माणवकं पन्थानं पृच्छति। अत्र वाक्ये प्रच्छिधातोः प्रयोगः अस्ति। पथिकः कर्ता अस्ति। पन्थाः मुख्यकर्म अस्ति। माणवकः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र प्रच्छिधातोः जिज्ञासाविषयभूतार्थज्ञानानुकूलव्यापारः अर्थः। (पथिकस्य या जिज्ञासा तस्याः विषयः पन्था अस्ति। तज्ज्ञानानुकूलव्यापारः केन पथा गच्छामि इत्याकारकप्रश्नरूपः व्यापारः।) एतादृशव्यापाराश्रयः पथिकः। अतः सः कर्ता। जिज्ञासाविषयभूतार्थज्ञानरूपफलाश्रयत्वात् पथः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। माणवकस्य कारकत्वेऽपि न कापि विशिष्टा अपादानादिसंज्ञा प्राप्ता। अतस्तत्र नटस्य शृणोति इतिवत् षष्ठी प्राप्ता। एवञ्च माणवकस्य अपादानत्वादिविशेषरूपेण सर्वथा अप्राप्तिपूर्विका अविवक्षा वर्तते। एवञ्च माणवकः पृच्छ -धातुवाच्यक्रियायाः मुख्यकर्मणा पथा सह सम्बद्धः अपि अस्ति। अतस्तस्य माणवकस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च माणवकं पन्थानं पृच्छति इति प्रयोगः सिध्यति।

बालकः वृक्षं फलानि अवचिनोति। अत्र वाक्ये चिधातोः प्रयोगः अस्ति। बालकः कर्ता अस्ति। फलं मुख्यकर्म अस्ति। वृक्षः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र चिधातोः चयनानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः बालकः। अतः सः कर्ता। चयनरूपफलाश्रयत्वात् फलानां कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। चयनेन फलानां वृक्षात् विभागः भवति। विभागाश्रयत्वात् वृक्षस्य अपादानसंज्ञा प्राप्ता। किन्तु यदा अपादानत्वेन अविवक्षा क्रियते तदा सः अपादानत्वेन रूपेण अविवक्षितः भवति। अपि च स फलरूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य वृक्षस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च बालकः वृक्षं फलानि अवचिनोति इति प्रयोगः सिध्यति।

गुरुः शिष्यं धर्मं ब्रूते। अत्र वाक्ये ब्रूञ्धातोः प्रयोगः अस्ति। गुरुः कर्ता अस्ति। धर्मः मुख्यकर्म अस्ति। शिष्यः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र ब्रूञ्धातोः बोधनानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः गुरुः अस्ति। अतः सः कर्ता। बोधरूपफलाश्रयत्वात् धर्मस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। गुरुः शिष्यं कर्मणा धर्मेण सम्बन्धुम् इच्छति। अतः शिष्यस्य कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रेण सम्प्रदानसंज्ञा प्राप्ता। किन्तु यदा सम्प्रदानत्वेन अविवक्षा क्रियते तदा स सम्प्रदानत्वेन रूपेण अविवक्षितः भवति। अपि च स धर्मरूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य शिष्यस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति ततश्च गुरुः शिष्यं धर्मं ब्रूते इति प्रयोगः सिध्यति।

गुरुः शिष्यं धर्मं शास्ति। अत्र वाक्ये शासुधातोः प्रयोगः अस्ति। गुरुः कर्ता अस्ति। धर्मः मुख्यकर्म अस्ति। शिष्यः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र शासुधातोः शासनानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः गुरुः अस्ति। अतः सः कर्ता। शासनरूपफलाश्रयत्वात् धर्मस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। गुरुः शिष्यं कर्मणा धर्मेण सम्बन्धुम् इच्छति। अतः शिष्यस्य कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रेण सम्प्रदानसंज्ञा प्राप्ता। किन्तु यदा सम्प्रदानत्वेन अविवक्षा क्रियते तदा स सम्प्रदानत्वेन रूपेण अविवक्षितः भवति। अपि च स धर्मरूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य शिष्यस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति ततश्च गुरुः शिष्यं धर्मं शास्ति इति प्रयोगः सिध्यति।

देवः क्षीरनिधिं सुधां मथ्नाति। अत्र वाक्ये मन्थधातोः प्रयोगः अस्ति। देवः कर्ता अस्ति। सुधा मुख्यकर्म अस्ति। क्षीरनिधिः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र मन्थधातोः द्रवद्रव्यगतसारोद्भावनानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः देवः अस्ति। अतः सः कर्ता। द्रवद्रव्यगतसारोद्भावनरूपफलाश्रयत्वात् सुधायाः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। मन्थनेन क्षीरनिधेः सुधायाः विभागः भवति। अतः विभागाश्रयत्वात् क्षीरनिधेः अपादानसंज्ञा प्राप्ता। किन्तु यदा अपादानत्वेन अविवक्षा क्रियते तदा सः अपादानत्वेन रूपेण अविवक्षितः भवति। अपि च स सुधारूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य क्षीरनिधेः अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च देवः क्षीरनिधिं सुधां मथ्नाति इति प्रयोगः सिध्यति।

चौरः देवदत्तं शतं मुष्णाति। अत्र वाक्ये मुष्धातोः प्रयोगः अस्ति। चौरः कर्ता अस्ति। शतं मुख्यकर्म अस्ति। देवदत्तः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र मुष्धातोः हरणानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः चौरः अतः सः कर्ता। हरणरूपफलाश्रयत्वात् शतस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। शतविश्लेषे देवदत्तस्य अवधित्वेन अपादानसंज्ञा प्राप्ता। किन्तु यदा अपादानत्वेन अविवक्षा क्रियते तदा सः अपादानत्वेन रूपेण अविवक्षितः भवति अपि च, शतरूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य देवदत्तस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च चौरः देवदत्तं शतं मुष्णाति इति प्रयोगः सिध्यति।

गोपः ग्रामम् अजां नयति। अत्र वाक्ये नयतिधातोः प्रयोगः अस्ति। गोपः कर्ता अस्ति। अजा मुख्यकर्म अस्ति। ग्रामः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र नयतिधातोः देशान्तरसंयोगानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः गोपः अतः सः कर्ता। संयोगरूपफलाश्रयत्वात् अजायाः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। ग्रामस्य तु कर्मद्वाराफलाश्रयत्वात् अधिकरणसंज्ञा प्राप्ता। किन्तु यदा अधिकरणत्वेन अविवक्षा क्रियते तदा सः अधिकरणत्वेन रूपेण अविवक्षितः भवति। अपि च सः अजारूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य ग्रामस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च **गोपः ग्रामम् अजां नयति** इति प्रयोगः सिध्यति।

गोपः ग्रामम् अजां हरति। अत्र वाक्ये हरतिधातोः प्रयोगः अस्ति। गोपः कर्ता अस्ति। अजा मुख्यकर्म अस्ति। ग्रामः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र हरतिधातोः हरणानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः गोपः अस्ति। अतः सः कर्ता। हरणरूपफलाश्रयत्वात् अजायाः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। ग्रामस्य तु कर्मद्वाराफलाश्रयत्वात् अधिकरणसंज्ञा प्राप्ता। किन्तु यदा अधिकरणत्वेन अविवक्षा क्रियते तदा सः अधिकरणत्वेन रूपेण अविवक्षितः भवति। अपि च सः अजारूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य ग्रामस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च **गोपः ग्रामम् अजां हरति** इति प्रयोगः सिध्यति।

गोपः ग्रामम् अजां कृषति। अत्र वाक्ये कृषतिधातोः प्रयोगः अस्ति। गोपः कर्ता अस्ति। अजा मुख्यकर्म अस्ति। ग्रामः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र कृषतिधातोः कर्षणानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः गोपः अतः सः कर्ता। कर्षणरूपफलाश्रयत्वात् अजायाः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। ग्रामस्य तु

कर्मद्वाराफलाश्रयत्वात् अधिकरणसंज्ञा प्राप्ता। किन्तु यदा अधिकरणत्वेन अविवक्षा क्रियते तदा सः अधिकरणत्वेन रूपेण अविवक्षितः भवति। अपि च सः अजारूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य ग्रामस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च **गोपः ग्रामम् अजां कृषति** इति प्रयोगः सिध्यति।

गोपः ग्रामम् अजां वहति। अत्र वाक्ये वहतिधातोः प्रयोगः अस्ति। गोपः कर्ता अस्ति। अजा मुख्यकर्म अस्ति। ग्रामः गौणकर्म अस्ति। इति वाक्यस्य स्थितिः। गौणकर्म एवैतत्सूत्रस्य लक्ष्यं भवति। अतः तत्रैव सूत्रार्थस्य समन्वयः प्रस्तूयते।

तथाहि - अत्र वहतिधातोः वहनानुकूलव्यापारः अर्थः। एतादृशव्यापाराश्रयः गोपः अतः सः कर्ता। वहनरूपफलाश्रयत्वात् अजायाः कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति। ग्रामस्य तु कर्मद्वाराफलाश्रयत्वात् अधिकरणसंज्ञा प्राप्ता। किन्तु यदा अधिकरणत्वेन अविवक्षा क्रियते तदा सः अधिकरणत्वेन रूपेण अविवक्षितः भवति। अपि च सः अजारूपमुख्यकर्मणा सह सम्बद्धः अपि अस्ति। अतस्तस्य ग्रामस्य अकथितं चेति प्रकृतसूत्रेण कर्मसंज्ञा भूत्वा कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। ततश्च **गोपः ग्रामम् अजां वहति** इति प्रयोगः सिध्यति।

अत्रायं विशेषः - अथ एककर्मकाणां धातूनां प्रयोगकाले चैत्रः ग्रामं गच्छति इत्यादौ यदा कर्मणि प्रत्ययः क्रियते तदा कर्मणः उक्तत्वात् ततः प्रथमा भवति। कर्तुः अनभिहितत्वात् ततः तृतीया भवति। ततश्च चैत्रेण ग्रामः गम्यते इत्यादिप्रयोगाः भवन्ति। परन्तु गोपः गां पयः दोग्धि इत्यादौ द्विकर्मकधातुप्रयोगकाले कर्मणि प्रत्ययः भविष्यति चेद् अत्र तु कर्मद्वयं वर्तते तर्हि द्वयोर्मध्ये किं कर्म उक्तं भविष्यति इति चेद् उच्यते। कर्मद्विविधं भवति गौणं कर्म प्रधानं कर्म चेति। यस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति तत्प्रधानं कर्म इत्युच्यते। यस्य च अकथितं चेति सूत्रेण कर्मसंज्ञा भवति तत् गौणं कर्म इत्युच्यते। एवञ्च दुह् याच् पच् दण्ड् रुद् प्रच्छ चिञ् ब्रुञ् शास् जि मथ् मुष् इति एतेभ्यः द्वादशभ्यः धातुभ्यः गौणे कर्मणि कर्मप्रत्ययः भवति। णीञ् हृ कृष् वह् इति चतुर्भ्यः एतेभ्यः धातुभ्यः प्रधाने कर्मणि कर्मप्रत्ययः भवति।

अर्थनिबन्धना इयं संज्ञा - अस्मिन् सूत्रव्याख्याने षोडश धातवः द्विकर्मकाः इति प्रदर्शितम्। परन्तु येषां धातूनाम् अर्थः एतत् -षोडशधातुतुल्यः अस्ति, तेषामपि धातूनाम् द्विकर्मकत्वं भवति। तेन बलिं वसुधां भिक्षते इत्यादिप्रयोगः सम्भवति।

अत्र चतुरश्रे दुह्यादीनाम् द्वादशधातूनाम् कर्तरि कर्मणि प्रयोगः प्रदर्शितः -

कर्तरि प्रयोगः	**कर्मणि प्रयोगः**
गोपः **गां** पयः दोग्धि	गोपेन **गौः** पयः दुह्यते
वामनः **बलिं** वसुधां याचते।	वामनेन **बलिः** वसुधां याच्यते।
पाचकः **तण्डुलान्** ओदनं पचति	पाचकेन **तण्डुलाः** ओदनं पच्यन्ते।

राजा **गर्गान्** शतं दण्डयति	राज्ञा **गर्गाः** शतं दण्ड्यन्ते
कृष्णः **व्रजं** गाम् अवरुणद्धि	कृष्णेन **व्रजः** गाम् अवरुध्यते
पथिकः **माणवकं** पन्थानं पृच्छति	पथिकेन **माणवकः** पन्थानं पृच्छयते
जनः **वृक्षं** फलानि अवचिनोति	जनेन **वृक्षः** फलानि अवचीयते
गुरुः **माणवकं** धर्मं ब्रूते	गुरुणा **माणवकः** धर्मम् उच्यते
गुरुः **माणवकं** धर्मं शास्ति	गुरुणा **माणवकः** धर्मं शिष्यते

अत्र चतुरश्रे नीहृ -कृष् -वहाम् चतुर्णां धातूनाम् कर्तरि कर्मणि प्रयोगः प्रदर्शितः -

कर्तरि प्रयोगः	**कर्मणि प्रयोगः**
गोपः **अजां** ग्रामं नयति	गोपेन **अजा** ग्रामं नीयते
गोपः **अजां** ग्रामं हरति	गोपेन **अजा** ग्रामं ह्रियते
गोपः **अजां** ग्रामं कृषति	गोपेन **अजा** ग्रामं कृष्यते
गोपः **अजां** ग्रामं वहति	गोपेन **अजा** ग्रामं उह्यते

[२१.२] गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ॥ (१.४.५२)

सूत्रार्थः - गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां शब्दकर्मणाम् अकर्मकाणाम् च प्रयोगे अनुत्पन्ने णिचि यः कर्ता सः णिचि उत्पन्ने सति कर्मसंज्ञः स्यात्।

सूत्रावतरणम् - संस्कृतभाषायाम् तावत् षट् कारकाणि सन्ति। कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणम् चेति। एतेषु कर्म किं भवति इति प्रतिपादयितुं बहूनि सूत्राणि प्रणीतानि पाणिनिना। तेषु इदम् अन्यतमम् सूत्रम्।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञां कर्मसंज्ञां च करोति। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम् इति षष्ठीबहुवचनान्तं पदम्। अणिकर्ता इति प्रथमैकवचनान्तं पदम्। स इति प्रथमैकवचनान्तं पदम्। णौ इति सप्तमीबहुवचनान्तं पदम्। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम् इति पदं समस्तमस्ति। गतिश्च बुद्धिश्च प्रत्यवसानञ्च इति गतिबुद्धिप्रत्यवसानानि, अत्र इतरेतरयोगद्वन्द्वसमासः। गतिबुद्धिप्रत्यवसानानि अर्थाः येषां ते गतिबुद्धिप्रत्यवसानार्थाः, अत्र बहुव्रीहिसमासः। शब्दः कर्म येषां ते शब्दकर्माणः, अत्र बहुव्रीहिसमासः वर्तते। न विद्यते कर्म येषां ते अकर्मकाः, अत्रापि बहुव्रीहिसमासः। गतिबुद्धिप्रत्यवसानार्थाश्च शब्दकर्माणश्च अकर्मकाश्च इति गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाः तेषां

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम् इति अत्र द्वन्द्वसमासः। एवञ्चास्य पदस्यार्थो भवति गत्यर्थकानाम्, ज्ञानार्थकानाम्, प्रत्यवसानार्थकानाम् शब्दकर्मणाम्, अकर्मकाणाम् इति। अत्र प्रत्यवसानशब्दस्यार्थो भवति भक्षणम्। अणिकर्ता इति पदमपि समस्तमस्ति। न णिः इति अणिः, अणेः कर्ता इति अणिकर्ता, अत्र नञ्तत्पुरुषगर्भषष्ठीतत्पुरुषसमासः।

सूत्रार्थविचारः - गत्यर्थकानां बुद्ध्यर्थकानां प्रत्यवसानार्थकानां शब्दकर्मणाम् अकर्मकाणां च धातूनाम् अणिकर्ता णौ कारकसंज्ञः सन् कर्मसंज्ञः भवति इति वाक्ययोजना। अत्र अणिकर्ता इति पदस्य अनुत्पन्ने णिचि यः कर्ता स एव अणिकर्ता इत्युच्यते। णौ इत्यस्य उत्पन्ने णिचि इत्यर्थः। एवञ्च सूत्रार्थो भवति - गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां शब्दकर्मणाम् अकर्मकाणाम् च प्रयोगे अनुत्पन्ने णिचि यः कर्ता सः णिचि उत्पन्ने सति कारकसंज्ञः सन् कर्मसंज्ञः स्यात् इति प्रतिफलति।

उदाहरणम् - माता बालं विद्यालयं गमयति। गुरुः शिष्यं वेदं वेदयति। माता शिशुं तण्डुलं भोजयति। गुरुः शिष्यं वेदं पाठयति। युवा वृद्धं स्थापयति।

सूत्रार्थसमन्वयः -

माता बालं विद्यालयं गमयति। इदं गत्यर्थकधातुयुक्तमुदाहरणमस्ति। एतस्य उदाहरणस्य सिद्धिः इत्थम् - अत्र बालः विद्यालयं गच्छति इति वाक्यम्। अत्र अण्यन्तस्य शुद्धस्य गमिधातोः प्रयोगः अस्ति। तस्य च संयोगानुकूलव्यापारः अर्थः। तत्र संयोगानुकूलव्यापाराश्रयत्वात् बालः कर्ता भवति। तस्य उक्तत्वेन ततः प्रथमा। संयोगरूपफलाश्रयत्वात् विद्यालयः कर्म भवति। तस्य चानुक्तत्वेन ततः द्वितीया। तेन बालः विद्यालयं गच्छति इति प्रयोगः भवति। अत्र च बालः अनुत्पन्ने णिचि कर्ता अस्ति। अतः स अणिकर्ता अस्ति। यदा गम् -धातोः णिच् -प्रत्ययः भवेत् तदा अस्य बालस्य प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च बालात् द्वितीया भविष्यति। तदा माता बालं विद्यालयं गमयति इति प्रयोगः भवति। अर्थात् बालः विद्यालयं गच्छति, तं माता प्रेरयति इति माता बालं विद्यालयं गमयति इति प्रयोगः सिद्ध्यति।

गुरुः शिष्यं वेदं वेदयति। इदं ज्ञानार्थकधातुयुक्तमुदाहरणमस्ति। एतस्य उदाहरणस्य सिद्धिः कथं भवति इति चेद् उच्यते। अत्र शिष्यः वेदं वेत्ति इति वाक्यम्। अत्र वाक्ये अण्यन्तस्य शुद्धस्य विदिधातोः प्रयोगो वर्तते। तस्य च ज्ञानानुकूलव्यापारः अर्थः। तत्र ज्ञानानुकूलव्यापारस्य आश्रयः शिष्यः। अतस्तस्य कर्तृसंज्ञा भवति। तस्य च उक्तत्वेन ततः प्रथमा विभक्तिः भवति। ज्ञानरूपफलस्य आश्रयः वेदः अस्ति। अतस्तस्य कर्मसंज्ञा भवति, तस्य अनुक्तत्वेन ततः द्वितीया भवति। एवञ्च शिष्यः वेदं वेत्ति इति प्रयोगो भवति। अत्र च शिष्यः अनुत्पन्ने णिचि कर्ता अस्ति। अतः स अणिकर्ता अस्ति। यदा विद् -धातोः णिच् -प्रत्ययः भवेत् तदा अस्य शिष्यस्य प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च शिष्यात् द्वितीया भविष्यति। तदा गुरुः शिष्यं वेदं वेदयति इति प्रयोगो भवति। शिष्यः वेदं वेत्ति, तं गुरुः प्रेरयति, इति गुरुः शिष्यं वेदं वेदयति इति प्रयोगः सिद्ध्यति।

माता शिशुं तण्डुलं भोजयति। इदं भोजनार्थकधातुयुक्तम् उदाहरणम् अस्ति। एतस्य उदाहरणस्य सिद्धिः कथं भवति इति चेद् उच्यते। शिशुः ओदनं भुङ्क्ते इति वाक्यम्। अत्र अण्यन्तस्य शुद्धस्य भुजिधातोः प्रयोगो वर्तते। तस्य च गलबिलाधःसंयोगानुकूलव्यापारः अर्थः। तत्र

गलबिलाधःसंयोगानुकूलव्यापारस्य आश्रयः शिशुः अस्ति। अतस्तस्य कर्तृसंज्ञा भवति, तस्योक्तत्वेन च ततः प्रथमा भवति। गलबिलाधःसंयोगरूपफलस्य आश्रयः तण्डुलः। अतस्तस्य कर्मसंज्ञा भवति। तस्यानुक्तत्वेन च ततः द्वितीया भवति। एवञ्च शिशुः तण्डुलं भुङ्क्ते इति प्रयोगो भवति। अत्र च शिशुः अनुत्पन्ने णिचि कर्ता अस्ति। अतः स अणिकर्ता अस्ति। यदा भुज् -धातोः णिच् -प्रत्ययः भवेत् तदा अस्य शिशोः प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च शिशोः द्वितीया भविष्यति। तेन माता शिशुम् तण्डुलं भोजयति इति प्रयोगः भवति। शिशुः तण्डुलं भुङ्क्ते, तं माता प्रेरयति, इति माता शिशुं तण्डुलं भोजयति इति प्रयोगः सिद्ध्यति।

गुरुः शिष्यं वेदं पाठयति। इदं शब्दकर्मकधातुयुक्तमुदाहरणम् अस्ति। एतस्य उदाहरणस्य सिद्धिः कथं भवति इति चेद् उच्यते। अत्र शिष्यः वेदं पठति इति वाक्यम्। अत्र वाक्ये अण्यन्तस्य शुद्धस्य पठिधातोः प्रयोगो वर्तते। तस्य ज्ञानानुकूलव्यापारः अर्थः। तत्र ज्ञानानुकूलव्यापारस्य आश्रयः शिष्यः। अतस्तस्य कर्तृसंज्ञा भवति। तस्य च उक्तत्वेन ततः प्रथमा विभक्तिः भवति। ज्ञानरूपफलस्य आश्रयः वेदः अस्ति। अतस्तस्य कर्मसंज्ञा भवति। तस्य अनुक्तत्वेन ततः द्वितीया भवति। एवञ्च शिष्यः वेदं पठति इति प्रयोगो भवति। अत्र च शिष्यः अनुत्पन्ने णिचि कर्ता अस्ति। अतः सः अणिकर्ता अस्ति। यदा पठ् -धातोः णिच् -प्रत्ययः भवेत् तदा अस्य शिष्यस्य प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च शिष्यात् द्वितीया भविष्यति। तदा गुरुः शिष्यं वेदं पाठयति इति प्रयोगो भवति। अर्थात् शिष्यः वेदं पठति, तं गुरुः प्रेरयति, इति गुरुः शिष्यं वेदं पाठयति इति प्रयोगः सिद्ध्यति।

अत्रेदं बोध्यम् - शब्दकर्म इति शब्दस्य अर्थो भवति - शब्दः कर्म कारकम् यस्य धातोः स धातुः शब्दकर्मा। यथा प्रकृतोदाहरणे पठ् -धातोः कर्म भवति वेदः। वेदः च शब्दराशिविशेष एव।

युवा वृद्धं स्थापयति। इदम् अकर्मकधातुयुक्तम् उदाहरणम् अस्ति। तस्य उदाहरणस्य सिद्धिः कथं भवति इति चेद् उच्यते। वृद्धः तिष्ठति इति वाक्यम्। अत्र अण्यन्तस्य शुद्धस्य स्थाधातोः प्रयोगो वर्तते। तस्य च स्थित्यनुकूलव्यापारः अर्थः। तस्य आश्रयः वृद्धः। अतस्तस्य कर्तृसंज्ञा भवति। तस्योक्तत्वेन ततः प्रथमा भवति। तेन वृद्धः तिष्ठति इति प्रयोगः सिध्यति। अत्र च वृद्धः अनुत्पन्ने णिचि कर्ता अस्ति। अतः सः अणिकर्ता अस्ति। यदा स्था -धातोः णिच् -प्रत्ययः भवेत् तदा अस्य वृद्धस्य प्रकृतसूत्रेण कर्मसंज्ञा भवति। ततश्च वृद्धाद् द्वितीया भविष्यति। ततश्च युवा वृद्धं स्थापयति इति प्रयोगः भवति। अर्थात् वृद्धः तिष्ठति, तं युवा प्रेरयति, इति युवा वृद्धं स्थापयति इति प्रयोगः सिद्ध्यति।

अत्रायं विशेषः - गत्यर्थकानां धातूनां ज्ञानार्थकानां धातूनां भक्षणार्थकानां धातूनां शब्दकर्मकाणां धातूनाम् अकर्मकाणां च धातूनां प्रयोगे एव प्रयोज्यकर्तुः कर्मसंज्ञा गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रेण क्रियते। अन्यधातूनां प्रयोगे तु प्रयोज्यकर्तुः कर्तृसंज्ञा एव भवति। ततश्च तेषां प्रयोगे काले प्रयोज्यकर्तृवाचकशब्दात् तृतीयाविभक्तिः भवति। यथा चैत्रः मैत्रेण तण्डुलं पाचयति इत्यादौ बोध्यम्।

अत्रायञ्चापि विशेषः - अथ एककर्मकाणां धातूनां प्रयोगकाले चैत्रः मैत्रेण तण्डुलं पाचयति इत्यादौ यदा कर्मणि प्रत्ययः क्रियते तदा कर्मणः उक्तत्वात् ततः प्रथमा भवति। कर्तुः अनभिहितत्वात्

ततः तृतीया भवति। ततश्च चैत्रेण मैत्रेण तण्डुलः पच्यते इत्यादिप्रयोगाः भवन्ति। परन्तु माता बालकं विद्यालयं गमयति इत्यादौ द्विकर्मकधातुप्रयोगकाले यदि कर्मणि प्रत्ययः भविष्यति एवञ्च अत्र कर्मद्वयं वर्तते तर्हि द्वयोर्मध्ये किं कर्म उक्तं भविष्यति इति चेद् उच्यते। कर्मद्विविधं भवति गौणं कर्म प्रधानं कर्म चेति। यस्य कर्तुरीप्सिततमं कर्म इति सूत्रेण कर्मसंज्ञा भवति तत्प्रधानं कर्म इत्युच्यते। यस्य च गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रेण कर्मसंज्ञा भवति तत् गौणं कर्म इत्युच्यते। एवञ्च ज्ञानार्थकधातूनां भक्षणार्थकधातूनां शब्दकर्मकधातूनां च प्रयोगकाले स्वेच्छया गौणे कर्मणि प्रधाने कर्मणि वा कर्मप्रत्ययाः भवन्ति। अकर्मकधातूनां गत्यर्थकधातूनां वा प्रयोगकाले गौणे कर्मणि कर्मप्रत्ययाः भवन्ति।

तथाहि कारिका -

बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।।

अधः चतुरश्रे सूत्रोक्तानां धातूनां कर्तरि कर्मणि वाक्यानि प्रदर्शितानि -

कर्तरि प्रयोगः	कर्मणि प्रयोगः
गुरुः शिष्यं वेदं वेदयति	गुरुणा शिष्यः वेदं वेद्यते / गुरुणा शिष्यं वेदः वेद्यते
माता शिशुं तण्डुलं भोजयति	मात्रा शिशुः तण्डुलं भोज्यते / मात्रा शिशुं तण्डुलः भोज्यते
गुरुः शिष्यं वेदं पाठयति	गुरुणा शिष्यः वेदं पाठ्यते / गुरुणा शिष्यं वेदः पाठ्यते
युवा वृद्धं स्थापयति	यूना वृद्धः स्थाप्यते
माता बालं विद्यालयं गमयति	मात्रा बालः विद्यालयं गम्यते

कर्तृकरणयोस्तृतीया (अनभिहिते/अनुक्ते कर्तरि ३)

गति - २
नी वह - ३
नियन्तृकर्तृक वह - २

प्रत्यवसान - २
आदि खाद - ३
भक्ष अहिंसार्थकः - ३

बुद्ध्यर्थक, शब्दकर्मक, अकर्मक, जल्पतिप्रभृति, दृश् - २

हृ, कृ, अभि+वद्+णिच्+आ.प, दृश्+णिच्+आ.प. - २/३

पाठसारः

अस्मिन् पाठे अकथितं च इति सूत्रस्य व्याख्या वर्तते। अनेन सूत्रेण अपादानत्वादिविशेषरूपेण अविवक्षितस्य कारकस्य कर्मसंज्ञा क्रियते। किन्तु इदं सूत्रं सर्वत्र नैव प्रवर्तते। तत् केवलं षोडशधातूनां प्रयोगे तत्तुल्यार्थकानां धातूनां च प्रयोगे एव प्रवर्तते। अनेन सूत्रेण यस्य कर्मसंज्ञा भवति तत् गौणं कर्म अविवक्षितं कर्म इति वा उच्यते। यदि अपादानादिरूपेण विवक्षा स्यात् तर्हि कर्म संज्ञा न भवति, अपादानादिसंज्ञा एव भवन्ति।

ततः परं गतिबद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रस्य व्याख्या वर्तते। अनेन सूत्रेण प्रयोज्यकर्तुः कर्मसंज्ञा क्रियते। किन्तु इदमपि सूत्रं न हि सर्वत्र प्रवर्तते, अपि तु गत्यर्थानां ज्ञानार्थकानां भक्षणार्थकानां शब्दकर्मकाणाम् अकर्मकाणां च धातूनां प्रयोगकाले एव प्रवर्तते। अनेन सूत्रेण यस्य कर्मसंज्ञा भवति तदपि गौणं कर्म प्रयोज्यं कर्म इति वा उच्यते। अन्येषां धातूनां प्रयोगे तु प्रयोज्यस्य कर्तृसंज्ञा एव तिष्ठति।

एवम् उभयत्र यदि कर्मणि प्रत्ययः विधीयते तदा कतरत् कर्म उक्तं भवति इत्यपि विषयः सोदाहरणम् उपन्यस्तः।

पाठगतप्रश्नाः

१. अकथितं च इति सूत्रं किं करोति।
२. अकथितम् इति पदस्य कः अर्थः।
३. प्रत्यवसानम् इत्यस्य कः अर्थः।
४. शब्दकर्मा इत्यत्र कः समासः।
५. अकर्मकाः इति पदे कः समासः।
६. गतिबुद्धिप्रत्यवसानार्थाः इत्यत्र कः समासः, कश्च विग्रहः।
७. दुह्यादिधातूनां कस्मिन् कर्मणि कर्मप्रत्ययः भवति।
८. नीधातोः कस्मिन् कर्मणि कर्मप्रत्ययः भवति।
९. गौणं कर्म किं भवति।
१०. प्रधानं कर्म किं भवति।

पाठान्तप्रश्नाः

१. अकथितं च इति सूत्रस्य व्याख्या कार्या।
२. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रं व्याख्यात।

३. गोपः गां पयः दोग्धि इति वाक्यस्य सिद्धिं प्रदर्शयन्तु।
४. माता बालं विद्यालयं गमयति इति वाक्यस्य सिद्धिं लिखन्तु।
५. गुरुः शिष्यं धर्मं ब्रूते इति वाक्यस्य सिद्धिप्रक्रियां लिखत।
६. युवा वृद्धं स्थापयति इति वाक्यस्य सिद्धिप्रक्रियां लिखत।
७. गोपः अजां ग्रामं नयति इति वाक्यस्य सिद्धिप्रक्रियां लिखन्तु।
८. द्विकर्मधातूनां प्रयोगे कर्मवाच्ये कथं व्यवस्था भवति इति लिखन्तु।

पाठगतप्रश्नोत्तराणि

१. अकथितं च इति सूत्रं कर्मसंज्ञां करोति।
२. अकथितम् इति पदस्य अविवक्षितम् अर्थः।
३. प्रत्यवसानम् इत्यस्य भक्षणम् इति अर्थः।
४. शब्दकर्मा इत्यत्यत्र बहुव्रीहिसमासः। तस्य च विग्रहः शब्दः कर्म यस्य स शब्दकर्मा।
५. अकर्मकाः इति पदे बहुव्रीहिसमासः। तस्य च विग्रहः न विद्यते कर्म येषां ते अकर्मकाः।
६. अत्र द्वन्द्वगर्भबहुव्रीहिसमासः। तस्य च विग्रहः गतिश्च बुद्धिश्च प्रत्यवसानञ्च इति गतिबुद्धिप्रत्यवसानानि। गतिबुद्धिप्रत्यवसानानि अर्थाः येषां ते गतिबुद्धिप्रत्यवसानार्थाः।
७. दुह्यादिधातूनां गौणे कर्मणि कर्मप्रत्ययः भवति।
८. नीधातोः प्रधाने कर्मणि कर्मप्रत्ययः भवति।
९. अकथितं च इति सूत्रेण गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इति सूत्रेण वा यस्य कर्मसंज्ञा भवति तद् गौणं कर्म भवति।
१०. कर्तुरीप्सिततमं कर्म इति सूत्रेण यस्य कर्मसंज्ञा भवति तत् प्रधानं कर्म भवति।

।।इति एकविंशः पाठः।।